दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-144 | 1 | मार्च 16, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रकृष्णद्वादशी-त्रयोदशी
चैत्र 02 प्रविष्टांशः मङ्गलमयः भवेत्

2 चिकित्सालयवत् कार्यं कुर्वन्तु न्यायपालिकाः- मुख्यन्यायाधीशः सूर्यकान्तः

3 AIR INDIA -एअर इण्डिया एक्सप्रेस संस्थाभ्यां यूएई-विशेषविमानानि निरस्तानि

4 श्रम-रोजगारमन्त्री मनसुख मांडविया जूनागढ़-जनपदस्य बंटवा क्षेत्रे नगरनिगमभवनस्य, उद्यानस्य, रुग्णवाहनस्य च उद्घाटनं कृतवान्

## नेपालदेशस्य गोरखा-मण्डले मार्गदुर्घटनायां सप्त भारतीयाः तीर्थयात्रिणः मृताः

**हिमसंस्कृतवार्ताः** - नेपालदेशे गोरखा-मण्डले लघु-बस-यान-दुर्घटनायां सप्त भारतीयाः मृताः, अन्ये च नैके व्रणिताः। आरक्षकानुसारं, विद्युत्-लघु-बस-याने षोडश जनाः आसन, यस्मिन् चतुर्दशः भारतीय-तीर्थयात्रिणः मानकामना-देवालयात् प्रत्यागताः आसन्, यदा शाहिद-लखन-ग्रामीण-नगरपालिकायाः पंक्तौ यानं मार्गात् व्यतिक्रमम् अभवत्। वाहनं पर्वतस्य पार्श्वे प्रायः द्विशत मीटर अधः पतितम्। दुर्घटनायां सप्त भारतीयाः नागरिकाः घटनास्थले एव मृताः इति आरक्षकाः सुचितवन्तः । मृतेषु द्वे महिले पञ्च पुरुषाः च आसन् ये पूजायै मन्दिरे गताः आसन्। अन्ये सप्त यात्रिणः व्रणिताः, रक्षिताः च।

## सी. बी. एस. ई. इत्यनेन अग्रिम-मासस्य दश दिनाङ्कपर्यन्तं द्वादशी कक्षायाः परीक्षाः निरस्ती कृता

**हिमसंस्कृतवार्ताः** - केन्द्रीय-माध्यमिक शिक्षा परिषदा (सी. बी. एस. ई.) इत्यनेन अग्रिममासस्य दश दिनाङ्कपर्यन्तं द्वादशी कक्षायाः परीक्षाः निरस्ती कृता। पूर्वं स्थगिताः परीक्षाः अपि निरस्ताः भविष्यन्तीति सी. बी. एस. ई. संस्थया उक्तम्। पश्चिम-एशियायाः क्षेत्रे द्वादशी कक्षायाः अभ्यर्थिनां कृते परिणाम घोषणायाः पद्धतिः यथाकाले पृथक् अधिसूचितः भविष्यतीति अपि सूचितम्।

## संयुक्त-अरब-अमीरात-देशः ईरानस्य स्थानानां विरुद्धं प्रक्षेपास्त्राणां प्रहारार्थं स्वक्षेत्रस्य उपयोगाय अनुमतिं दत्तवान्

**हिमसंस्कृतवार्ताः** - संयुक्त-अरब-अमीरात-देशः ईरानस्य स्थानानां विरुद्धं प्रक्षेपास्त्राणां प्रहारार्थं स्वक्षेत्रस्य उपयोगाय अनुमतिं दत्तवान् इति ईरान-देशस्य आरोपानन्तरं गल्फ-क्षेत्रे विवादः वर्धितास्ति। ईरान-देशस्य विदेशमन्त्रिणा सईद अब्बास् अराघची इत्यनेन आरोपितं यत् रास-अल-खैमाह-नगरे तथा दुबई-नगरस्य समीपे स्थितेषु हिमार्स-राकेट-प्रणाल्या खार्ग-द्वीपे तथा अबू-मूसा द्वीपे च रात्रौ आक्रमणानि प्रारब्धानि । ईरान-देशस्य संयुक्तराज्यामेरिका-इजरायल-सङ्घस्य च मध्ये सङ्घर्षः निरन्तरं विस्तृतः भवति, येन सम्पूर्णे गल्फ-प्रदेशे अस्थिरतायाः आशङ्का वर्धते।

# निर्वाचनायोगेन असम-केरल-पुदुचेरी-तमिलनाडु-राज्येषु एक-चरणस्य विधानसभा-निर्वाचनस्य घोषणा कृता




**हिमसंस्कृतवार्ताः** - निर्वाचनायोगेन असम-केरल-पुदुचेरी-तमिलनाडु-राज्येषु एक-चरणस्य विधानसभा निर्वाचनस्य घोषणा कृता, पश्चिमबङ्गप्रदेशे तु द्वयोः चरणयोः निर्वाचनं भविष्यति । नवदेहल्यां पञ्चराज्येभ्यः केन्द्रशासितप्रदेशाय च निर्वाचन-कार्यक्रमस्य घोषणां कुर्वन् मुख्य-निर्वाचनायुक्तः ज्ञानेश-कुमारः अवदत् यत् असम-केरल-पुदुचेरी-राज्येषु अप्रैल-मासस्य नवमे दिनाङ्के मतदानं भविष्यति। तमिलनाडुराज्ये अप्रैल-मासस्य त्रयोविंशतिः दिनाङ्के मतदानं भविष्यति। पश्चिमबङ्गप्रदेशे अग्रिमे मासे त्रयोविंशतिः ऊनविंशतिः दिनाङ्के च मतदानं भविष्यति। चतुर्णां राज्यानां, एकस्य केन्द्र-शासितप्रदेशस्य च मतानां गणना मई-मासस्य चतुर्थे दिनाङ्के भविष्यति। श्रीकुमारः अवदत् यत्, निर्वाचन-कार्यक्रमस्य घोषणया एतेषु राज्येषु केन्द्रशासितप्रदेशे च तत्क्षणप्रभावेन आदर्श-आचारसंहिता प्रवर्तितास्ति ।

# सर्वकारेण पी.एन.जी. एवं एल.पी.जी. सम्पर्कयुक्तान् गृहान् तत्क्षणप्रभावेन स्वकीयं एल पी.जी. सम्पर्क समर्पयितुं निर्दिष्टम्।




**हिमसंस्कृतवार्ताः** - पेट्रोलियम-प्राकृतिक-गैस-मन्त्रालयः केन्द्रीय-पेट्रोलियम-प्राकृतिक गैस मन्त्रालयः, पाइप्ड्-नेचुरल गैस, पी. एन. जी. एवं लिक्विफाईड-पेट्रोलियम-गैस, एल. पी. जी. इत्येतयोः सम्पर्कयुक्तान् गृहान् तत्क्षणप्रभावेन स्वकीयं एल. पी. जी. सम्पर्क समर्पयितुं निर्दिष्टवान्। प्रसारितयाम् अधिसूचनायां, मन्त्रालयः अवदत् यत्, पी. एन. जी. सम्पर्कयुक्तः जनः गृहस्य एल. पी. जी. सम्पर्क धारयितुं वा सर्वकारीय-तैल-समवायेभ्यः अथवा तेषां अधिकृत-वितरकात् एल. पी. जी. सिलिण्डर इत्यस्य पुनः पूर्ति स्वीकर्तुं वा न अनुमन्यते। एतादृशाः उपभोक्तारः स्वस्य एल. पी. जी. सम्पर्क तत्क्षणमेव समर्पयन्तु। तैल-विपणन-संस्थाः अपि निर्देशिताः सन्ति यत् नूतनान् एल. पी. जी. सम्पर्कान् न प्रदास्यन्ते। सर्वकारः अवदत् यत्, गृहगैस इत्यस्य द्विगुणापूर्ति निवारयितुं तथा च पी. एन. जी. सम्पर्क न प्राप्तेभ्यः गृहेभ्यः एल. पी. जी. सिलिण्डर इत्यस्य उपलब्धता सुनिश्चेतुं एतत् आवश्यकमस्ति । पश्चिम-एशियायां विद्यमानसङ्कटस्य कारणात् वैश्विक इन्धन आपूर्ती व्यवधानस्य मध्ये एषा सूचना आगता। अत्रान्तरे, भारतस्य कूटनीतिकप्रयासानाम् अनन्तरम्, ईरान-देशः भारतीयध्वजयुतं द्वे एल. पी. जी. वाहकं नौकायाने होर्मुज-जलसंधिमार्गेण गन्तुं प्राददात्। नौवहनमन्त्रालयस्य विशेषसचिवः राजेशकुमारसिन्हा अवदत् यत् अधुना नौकायाने गुजरातस्य मुन्द्रा-कन्दला-नौकाश्रययोः गच्छन्ति।

# ईरान-इजराइल-संघर्षः-: मोजतबा खामनेई गुप्तचररूपेण रूसदेशं प्रेषितः

हिमसंस्कृतवार्ता। ईरान-इजराइल देशयोः वर्धमानस्य युद्धस्य मध्ये एका विशिष्टा सूचना विश्वं चकितं कृतवती। पुष्टिः क्रियते यत् ईरानस्य नूतनः सर्वोच्चनेता मोजतबा खामनेई गुप्तरीत्या रूसदेशं नीतः। कुवैतदेशस्य ‘अल जरीदा’ समाचारपत्रानुसारं, मोजतबा महोदयस्य क्षीयमाणं स्वास्थ्यं सुरक्षासंकटं च दृष्ट्वा सः रूसी-सैन्यविमानेन मॉस्को-नगरं प्रति स्थानान्तरितः।यत्र एकतः डोनाल्ड ट्रम्प महोदयः तस्य जीवितं विषये प्रश्नान् उत्थापयति, अन्यतः रूस-ईरान देशयोः इयं निकटता अस्मिन् युद्धे नूतनं वलयं दातुं शक्नोति।

### मोजतबा खामनेई इत्यस्य गुप्त-अभियानम्

वृत्तान्तानुसारं, मोजतबा खामनेई अतीव गोपनीयपद्धत्या तेहरानतः मॉस्को-नगरं प्रापितः। सुरक्षासंस्थानां भयं आसीत् यत् इजराइली-आक्रमणानां मध्ये तस्य स्थानं प्रकटितं भवितुं शक्नोति, येन तस्य प्राणभयं वर्धेत।

**मुख्यविवरणम्:** एका पुष्टिः अस्ति यत् रूसी-राष्ट्रपतिः व्लादिमीर पुतिन स्वयं ईरानी-राष्ट्रपतिं मसूद पजेश्कियनं प्रति



तस्य रूसदेशे शरणदानस्य प्रस्तावं कृतवान्। इदम् अभियानं तावत्या सावधानतया कृतं यथा पाश्चात्य-गुप्तचरसंस्थाः अपि किमपि ज्ञातुं न शक्तवत्यः। कुवैतस्य वार्तापत्रस्य पुष्टिः अस्ति यत् मोजतबा मॉस्को-नगरस्य राष्ट्रपतिभवने (क्रेमलिन) स्थिते एकस्मिन् विशिष्टे चिकित्सालये पञ्जी कृतः अस्ति। ईराने निरन्तरं प्रचलतानां विस्फोटानां कारणात् तत्र तस्य चिकित्सा शस्त्रक्रिया च असम्भवा आसीत्। रूसदेशे प्राप्य तस्य सफला शस्त्रक्रिया कृता, अधुना सः विशेषज्ञैः रक्षितः अस्ति। इदं पदं रूस-ईरान देशयोः प्रगाढं सैन्य-सामरिकसम्बन्धं अपि दर्शयति, यत् अमेरिकादेशस्य कृते महती चिन्ता अस्ति।

## सुभाषितम्

**दंभो दर्पोऽभिमानश्च,**
**क्रोधः पारुष्यमेव च।**
**अज्ञानं चाभिजातस्य,**
**पार्थ! संपदमासुरीम्।।**

हे अर्जुन! आसुरी सम्पत्ति के साथ उत्पन्न हुए मनुष्य में दम्भ, दर्प, अभिमान, क्रोध, निष्ठुरता और अज्ञान होते हैं।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७११४
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

# चिकित्सालयवत् कार्यं कुर्वन्तु न्यायपालिकाः- मुख्यन्यायाधीशः सूर्यकान्तः



## १५२ कोटिरूप्यकाणां व्ययेन मण्डी-नगरे निर्माणार्हस्य 'न्यायिकपरिसरस्य' शिलान्यासः

हिमसंस्कृतवार्ताः- मण्डी।

भारतस्य मुख्यन्यायाधीशः न्यायमूर्तिः सूर्यकान्तः मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खु महोदयस्य उपस्थितौ रविवासरे १५२ कोटिरूप्यकाणां व्ययेन निर्मास्यमाणस्य मण्डी- न्यायिक- परिसरस्य शिलान्यासम् अकरोत्। एतत् अत्याधुनिकं न्यायालयभवनं ९.६ हेक्टेयरमिते भूक्षेत्रे भविष्यति, यस्मिन् चत्वारः 'खण्डाः' (Blocks) भविष्यन्ति तथा च न्यायाधीशानां, अधिवक्तॄणां जनसामान्यस्य च कृते उत्तमाः सुविधाः उपलब्धाः भविष्यन्ति।

ततः परं, विधिक-साक्षरताशिविरे मुख्यन्यायाधीशः सूर्यकान्तः अवदत् यत्- “न्यायिक- परिसराणाम् आवश्यकता अस्ति यत् ते चिकित्सालयवत् कार्यं कुर्वन्तु।” सः उक्तवान् यत् यथा जनाः स्वास्थ्यलाभस्य आशया चिकित्सालयं गच्छन्ति, तथैव न्यायव्यवस्थया अपि सेवाभावेन कार्यं करणीयम्। जनाः न्यायालये साहाय्यस्य (relief) आशया आगच्छन्ति, अतः सुविधानां वर्धनेन सह अस्माकं उत्तरदायित्वम् अपि वर्धते। मण्डीनगरं 'लघुकाशी' इति नाम्ना विख्यातम् अस्ति, अद्य अत्र न्याय-मन्दिरस्य स्थापना भवति, यत् शीघ्रमेव सज्जं भविष्यति।

## मौलिक-कर्तव्यानां गुरुत्वम्

मुख्यन्यायाधीशः अवदत् यत् सर्वे मौलिक-अधिकाराणां चर्चां तु कुर्वन्ति, परन्तु मौलिक-कर्तव्यानि अपि संविधानस्य अभिन्न-अङ्गानि सन्ति। हिमाचलप्रदेशः स्वकीयां प्राकृतिकसुन्दरतां सुरक्षितवान् अस्ति। जनसामान्यं कर्तव्यानां प्रति जागरूकं कर्तुं लघुस्तरे अपि ईदृशानां सङ्गोष्ठीनाम् आयोजनं करणीयम्।

## मुख्यमन्त्रिणः सम्बोधनम्- सामाजिकन्यायस्य सङ्कल्पः

मुख्यमन्त्रीमहोदयः मुख्यन्यायाधीशस्य स्वागतं कुर्वन् अवदत् यत्- "प्रत्येकं नागरिकं प्रति न्यायस्य अधिकारस्य च प्राप्तिः अस्माकं सर्वकारस्य सङ्कल्पः अस्ति।" सः सर्वकारस्य उपलब्धीनां विषये उक्तवान् यत् ६००० अनाथ- बालकाः राज्यस्य बालकाः (चिल्ड्रन ऑफ द स्टेट) इति रूपेण अङ्गीकृताः। कन्याणां विवाहवयः २१ वर्षाणि कृताणि। पैतृक-सम्पत्तौ कन्याभ्यः अपि १५० बीघापरिमितं समानम् अधिकारं दत्तम्। राजस्वयायालयस्य आयोजनेन ५.५ लक्षं लम्बित- प्रकरणानां निस्तारणं कृतम्। मुख्यमन्त्रिणा पुनः एकदा राजस्व- हानि- अनुदानस्य (RDG) स्थगनस्य विषये चिन्ता प्रकटिता, यत् अनुच्छेद- २७५(१) अन्तर्गतं ७३ वर्षेभ्यः मिलति स्म।

**अन्य-न्यायाधीशानां विचाराः**

न्यायमूर्तिः गुरमीत सिंह संधावालियाः सः अवदत् यत् न्यायः केवलं न्यायालय-कक्षाभ्यः बहिः गत्वा प्रत्येकं जनं प्रति प्राप्तव्यः।

न्यायमूर्तिः विवेकठाकुरः अवदत् यत् कर्तव्यानां पालनेन अधिकाराणां रक्षा स्वयं भवति। न्यायमूर्तिः अजयमोहन गोयलः अवदत् यत् मण्डीनगरस्य एषा पुरातनी अभ्यर्थना अद्य पूर्णा अभवत्।

न्यायमूर्तिः संदीपशर्मा सर्वेभ्यः धन्यवादं ज्ञापितवान्। अस्मिन् अवसरे न्यायमूर्तिः ज्योत्सना रिवाल दुआ, सुशील कुकरेजा, वीरेंद्र सिंह, रंजन शर्मा, बिपिन चंद्र नेगी, राकेश कैंथला, जिया लाल भारद्वाज, रोमेशवर्मा इत्यादयः गणमान्याः अतिथयः उपस्थिताः आसन्।

# संविधानस्य भावनानुगुणं भवतु राज्याणां अधिकाररक्षा - मुख्यमन्त्री सुक्खुः


## मण्डीनगरस्य 'संस्कृतिसदने' मौलिक- अधिकार- कर्तव्य- विषये सङ्गोष्ठ्याः आयोजनम्



हिमसंस्कृतवार्ताः- मण्डी।

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः रविवासरे मण्डी-नगरस्य संस्कृतिसदने 'मौलिक अधिकारः एवं कर्तव्यम्' इति विषये आयोजितायां सङ्गोष्ठ्यां राजस्व- हानि-अनुदानस्य (RDG) विषये वक्तुं न विस्मृतवान्। अस्मिन् आयोजने मौलिक- अधिकार- कर्तव्यानां वर्तमानपरिदृश्ये चर्चा प्रचलति स्म। अस्मिन् अन्तरे स्वकीये सम्बोधने मुख्यमन्त्री संविधानस्य उल्लेखं कुर्वन् केन्द्रपक्षतः 'आरडीजी' (RDG) समाप्ति-विषये उक्तवान्। मुख्यमन्त्री अवदत् यत्- "एषः कोऽपि राजनैतिकमञ्चः नास्ति, परन्तु खिन्नेन मनसा वक्तव्यं भवति यत् हिमाचलप्रदेशाय स्वकीय- अधिकाररूपेण प्राप्यमाणं राजस्व-हानि-अनुदानं स्थगितं कृतम् अस्ति, येन राज्यस्य वित्तीय-स्थितौ महत् प्रभावः अभवत्। एतत् अनुदानं हिमाचलप्रदेशाय संविधानस्य अनुच्छेद-२७५(१) इत्यस्य अन्तर्गतं प्रदीयते स्म। १९५२ तमे वर्षे आरब्धायाः अस्याः व्यवस्थायाः अन्तर्गतं विगतेभ्यः ७३ वर्षेभ्यः हिमाचलप्रदेशः एतद् 'अनुदानं' (Grant) निरन्तरं प्राप्नोति स्म।“ सः उक्तवान् यत्- "भारतस्य संविधानं विश्वस्य अतीव व्यापकं प्रगतिशीलं च संविधानं वर्तते, एतच्च अस्माकं लोकतन्त्रस्य आधारशिला अस्ति। संविधानं प्रत्येकं नागरिकं प्रति मौलिक- अधिकारान् प्रयच्छति, येन तेषां कृते गरिमा- स्वतन्त्रता-समानताभिः सह जीवनयापनस्य अवसरः लभ्यते।" सः अपि अवदत् यत् अस्माभिः एतत् अपि स्मर्तव्यं यत् अधिकारैः सह कर्तव्यानि अपि तावदेव महत्त्वपूर्णानि सन्ति। यदि वयं स्व-अधिकारणां लाभं स्वीकर्तुम् इच्छामः, तर्हि स्व-कर्तव्यानां पालनम् अपि पूर्ण-निष्ठया करणीयम्।वर्तमाने जगत् तीव्रगत्या परिवर्तते, अतः मौलिक- अधिकार-कर्तव्यानां महत्त्वं बहुधा वर्धितम् अस्ति। उदयीमानेसु आह्वानेषु विधिज्ञानस्य महत्त्वम् अपि वर्धितम्। मुख्यमन्त्रिणः मतेन विधिक- साक्षरतायाः (Legal Literacy) माध्यमेन समाजे न्यायः, समानता, संवैधानिक-मूल्यानि च सुदृढानि कर्तुं शक्यन्ते। सः अवदत् यत् संविधानस्य भावनानुसारं राज्यसर्वकारः समावेशी-विकासं सामाजिकन्यायं च निश्चितुं कार्यं करोति। शिक्षा- स्वास्थ्य- सामाजिकसुरक्षा-पारदर्शि-प्रशासनानां माध्यमेन एतत् सुनिश्चितं क्रियते यत् प्रत्येकं नागरिकं समान-अवसरं प्राप्नुयात् लोकतन्त्रस्य मूलानि च अधिकाधिकं सुदृढानि भवेयुः।

# हिमाचलप्रदेशस्य ४५ स्थानेषु निरन्तरं मेघविस्फोटाः, संवेदनशीलस्थानेषु स्थापयिष्यन्ते स्वचालित-ऋतु-केन्द्राणि



**मेघविस्फोटात् पूर्वमेव प्राप्स्यते अचूक-सूचना**

हिमसंस्कृतवार्ताः - शिमला।

हिमाचलप्रदेशे कतिपयवर्षेभ्यः वर्धमानानां मेघविस्फोट-घटनानां मध्ये अधुना तादृश-संवेदनशीलस्थानानां पूर्वसूचना प्राप्स्यते, यत्र एतादृश्यः सम्भावनाः भवन्ति। वर्षाकाले प्राकृतिक-आपद्भ्यः न्यूनं क्षतं स्यात्, एतदर्थं पर्यावरण-विज्ञान-प्रौद्योगिकी-आपदाप्रबन्धनविभागेन त्रिचतुर-वर्षीय-योजना सज्जीकृता अस्ति।

विभागेन राज्यस्य विभिन्नेषु क्षेत्रेषु ४८ तादृशानि संवेदनशीलस्थानानि अन्विष्टानि सन्ति, यत्र विगतवर्षेभ्यः मेघविस्फोटस्य घटनाः निरन्तरं प्रकाशं प्रति आगताः। अधुना एतेषु ४८ स्थानेषु स्वचालितानि ऋतु-केन्द्राणि (Automatic Weather Stations) स्थापयिष्यन्ते। एतदर्थं विभागेन निविदा-प्रक्रिया (Tender Process) आरब्धा अस्ति।

# AIR INDIA -एअर इण्डिया एक्सप्रेस संस्थाभ्यां यूएई-विशेषविमानानि निरस्तानि




**हिमसंस्कृतवार्ताः - नवदेहली।** एअर इण्डिया तथा तस्याः सहायकसंस्था एअर इण्डिया एक्सप्रेस इत्यनया रविवासरे (१५ मार्च) संयुक्त अरब अमीरात (यूएई) देशस्य स्वकीयानि कानिचन् विशेषविमानानि निरस्तानि कृतानि। टाटा समूहस्य कम्पनीभिः रविवासरे सूचितं यत् यूएई विमानपत्तनाधिकारिणः (UAE Airport Authority) निर्देशानुसारं एतानि विमानानि निरस्तानि सन्ति। आबूधाबी, रस-अल-खैमा, शारजाह च गच्छतां विशेषविमानानां यात्रा निरस्तीकृता।

सामाजिकमाध्यमेषु प्रसारितेन वक्तव्येन माध्यमेन खेदं प्रकटयन् सूचितं यत् प्रभाविताः यात्रिणः विना कश्चित् अतिरिक्तं शुल्कं आगामिदिनाङ्कानां कृते स्वकीयं पत्रं (Ticket) पुनरारक्षितं कर्तुं शक्नुवन्ति अथवा पूर्णं धनं (Refund) प्रतिप्राप्तुं शक्नुवन्ति।

एतदतिरिक्तं, देहलीतः दुबईदेशं प्रति एअर इण्डिया संस्थायाः पञ्चसु चत्वारि विमानानि तथा एअर इण्डिया एक्सप्रेस संस्थायाः षट् विमानानां मध्ये पञ्च विमानानि निरस्तानि कृतानि। पूर्वं रविवासरे एअर इण्डिया तथा एअर इण्डिया एक्सप्रेस इत्यनया सामान्य-विशेषविमानानि संयोज्य आहत्य द्विसप्तति (७२) विमानानां संचालनाय सूचना प्रदत्ता आसीत्।

# २१ मार्च पर्यन्तं प्रतिकूलः भविष्यति ऋतुः, वृष्टि-हिमपात-करकापातानां च सम्भावना



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशस्य ऋतुविज्ञानविभागेन वृष्टेः हिमपातस्य च सम्भावना प्रकटीकृता, येन प्रदेशे रबी-सस्यानां कृते सार्धैकमासात् प्रचलन् शुष्कसमयः समाप्तः भवितुं शक्नोति। ऋतुविज्ञानविभागेन (IMD) कतिपयस्थानेषु वृष्टेः हिमपातस्य च अनुमानं कृतम्, येन तापमाने न्यूनता आगमिष्यति। विभागेन करकापाताय अपि सचेतना प्रसारिता अस्ति। विभागस्य राज्य-आपदा-प्रबन्धन-प्राधिकरणस्य च अनुसारं बिलासपुर-हमीरपुर-कुल्लू-मण्डी-शिमला-सिरमौर-सोलन-मण्डलानां केषुचित् भागेषु करकापातस्य प्रबला सम्भावना वर्तते।

विभानानुसारं १७ तथा २१ मार्च दिनाङ्के अल्पवृष्टिः हिमपातो वा भवितुं शक्नोति, परन्तु १६, १८ तथा १९ मार्च दिनाङ्के राज्यस्य बहुषु स्थानेषु मध्यमा वृष्टिः हिमपातो वा भविष्यति। विभागेन नारङ्गसचेतना' (Orange Alert) प्रसार्य उक्तं यत् कतिपयस्थानेषु गर्जनेन सह वृष्टिः, विद्युत्पातः, करकापातः तथा ४० तः ५० किलोमीटर् प्रतिघण्टा वेगेन तीव्रवायुः चलिष्यति। विभानानुसारं राज्ये न्यूनतमं तापमानं लाहौल-स्पीति जनपदस्य ताबो क्षेत्रे १.४ डिग्री, कल्पायां च २ डिग्री अङ्कितम्। शिमला-मनाली नगरयोः ९-९ डिग्री, सोलने १० डिग्री, नाहने १० डिग्री तथा भुन्तर-विमानपत्तने ११-११ डिग्री तापमानम् अभवत्। जुब्बड़हट्टी-मण्डी-सुन्दरनगर-ऊना क्षेत्रेषु १२-१२ डिग्री तथा बिलासपुर-धर्मशाला-पालमपुर नगरेषु १४ डिग्री तापमानम् अङ्कितम्।

# जीडी गोयनका विद्यालये क्रीडाभावनायाः उत्सवः, गुरुजनाः अभिभावकाः च क्रीडायाम्











**हिमसंस्कृतवार्ताः- कुणाल कौशिकः मोतिहारी।** मार्चमासस्य १५ तमे दिने जीडी गोयनका विद्यालयस्य क्रीडाङ्गणे शिक्षकदलस्य "गोयनका गुरवः", अभिभावकदलस्य "गोयनका टाइटन्स" इत्ययोः मध्ये मैत्रीपूर्णः रोमाञ्चकः क्रिकेट- क्रीडामहोत्सवः आयोजितः।

टॉस विजयेन अनन्तरं गोयनका टाइटन्स दलं प्रथमं क्षेत्ररक्षणं कर्तुं निर्णीतवन्तः। गोयनका गुरवः दलस्य कप्तानः श्री स्वराजः स्वनेतृत्वेन उत्कृष्टं बल्लेबनं प्रदर्श्य ८ विकेट नष्टेषु १३३ रनान् अर्जितवन्तः। तत्पश्चात् लक्ष्यं साधयितुं गोयनका टाइटन्स दलस्य दलनायक दीपकः स्वदलस्य नेतृत्वं कृतवान्। यद्यपि तेषां प्रयासः प्रशंसनीयः आसीत्, तथापि गुरुदलस्य उत्तमगेंदबाजी कारणात् ते केवलं ११२ रनान् एव कर्तुं शक्तवन्तः। अतः गोयनका गुरवः दलं विजयम् अलभत।

अयं क्रीडास्पर्धा जिला क्रिकेट संघस्य अम्पायरः इब्राहिम लोढी, जिला क्रिकेट खिलाड़ी प्रभात कुमार इत्येतयोः निरीक्षणे सम्पन्ना। चार्चित कृष्ण इत्यस्य उत्साहपूर्णा टिप्पणी सम्पूर्णक्रीडाम् अत्यन्तं रोचकां कृतवती।

विद्यालयप्रशासनम् अम्पायरयोः प्रति कृतज्ञतां प्रदर्शयितुं स्मृतिचिह्नानि प्रदत्तवन्तः। अस्मिन् क्रीडायाम् जीडी गोयनका विद्यालयस्य परिवहन प्रभारी श्री अभय सिंहः उत्कृष्टप्रदर्शनस्य कारणात् "मैन ऑफ द मैच" पुरस्कारं प्राप्तवान्। अयं कार्यक्रमः केवलं क्रीडा नासीत्, अपि तु शिक्षकाणां अभिभावकानां च मध्ये एकता, सद्भावना तथा क्रीडाभावना इत्येतस्य सुंदरम् उदाहरणम् अभवत्

# पुणेनगरे आगामि-वर्षेषु २०० किलोमीटर-मितं मेट्रो-जालं विकसितं भविष्यतिः मुख्यमन्त्री देवेन्द्र फडणवीस



महाराष्ट्रराज्यस्य मुख्यमन्त्री देवेन्द्र फडणवीस महोदयः उक्तवान् यत् पुणेनगरे आगामिषु वर्षेषु २०० किलोमीटर (द्विशत-सहस्रमानं) मितं मेट्रो-रेल-जालं विकसितं करिष्यते। श्री फडणवीस महोदयः अवदत् यत् अस्य विस्तारस्य कृते 'महाराष्ट्र मेट्रो' संस्थां प्रति व्यापकं योजनां सज्जीकर्तुं निर्देशाः प्रदत्ताः सन्ति।श्री फडणवीस महोदयः अ पुणे मेट्रो-रेल-परियोजनायाः 'जिला न्यायालय' (डिस्ट्रिक्ट कोर्ट) स्थानके 'मेट्रो भवन' परियोजनायाः उद्घाटनप्रसङ्गे भाषमाणः आसीत्। तेन उक्तं यत्: शिवाजीनगर-हिंजेवाड़ी मेट्रो-मार्गस्य ११ किलोमीटर परिमितस्य भागस्य उद्घाटनं अस्मिन् वर्षे मई मासे भविष्यति। अवशिष्टस्य १२ किलोमीटर परिमितस्य कार्यस्य जुलाई मासपर्यन्तं पूर्णतायाः आशा अस्ति। **राजनैतिकं वक्तव्यम्-** पत्रकारैः सह वार्तालापं कुर्वन् श्री फडणवीस महोदयः अकथयत् यत् देशे पर्याप्तः वायु-भण्डारः (Gas reserves) विद्यते। सः आरोपं कृतवान् यत् काङ्ग्रेस-नेता राहुल गान्धी तस्य दलस्य अन्ये नेतारश्च जनतायां निरर्थकं भयं उत्पादयन्ति। **विशेषः-:** मुख्यमन्त्री महोदयस्य अनुसारं पुणेनगरस्य परिवहनव्यवस्थायां एषः विस्तारः क्रान्तिकारी परिवर्तनं आनेष्यति।

# कज़ाख्स्तान-देशस्य जनाः नूतनसंविधानस्य विषये

### जनमतसङ्ग्रहाय मतदानं कुर्वन्तः

**हिमसंस्कृतवार्ताः -** कज़ाख्स्तान-देशस्य जनाः नूतनसंविधानस्य विषये जनमतसङ्ग्रहाय मतदानं कुर्वन्तः सन्ति, येन मध्य-एशियायाः बृहत्तमे देशे राष्ट्रपतिः कासिम जोमार्ट-टोकायेव इत्यस्य अधिकारं सुदृढं भविष्यति। एतेन प्रस्तावेन कज़ाकिस्तान-देशस्य उभे सदने एकस्मिन् संस्थायां विलीनीकर्तुं शक्नोति, तथा च उपराष्ट्रपतिपदस्य पुनर्स्थापनेन सह सर्वे सर्वकारीय-अधिकारिणां नियुक्तेः अधिकारं राष्ट्रपतिः विस्तारयितुं शक्नोति ।

# झारखंड-आरक्षकैः खूंटी-जनपदे पीएलएफआई-सङ्गठनस्य षट् उग्रवादिनः निगृहीताः

झारखंड-राज्यस्य आरक्षकैः (Police) खूंटी-जनपदे प्रतिबन्धितस्य 'पीपुल्स लिबरेशन फ्रंट ऑफ इंडिया' (PLFI) इति सङ्गठनस्य षट् उग्रवादिनः बद्धाः। **अभियानस्य विवरणम्-** आरक्षक-अधीक्षकः मनीष कुमारः सूचितवान् यत् गुप्तचर-सूचनायाः आधारेण तजना-नद्याः समीपे कृतायां धाट्यां ( छापेमारी) एते अभियुक्ताः गृहीताः। आरक्षकाणाम् अनुसारं, एते उग्रवादिनः वणिजः (Traders) तथा च निर्माण-अनुबन्धकान् (Contractors) भीषयित्वा बलात् धन-सङ्ग्रहणं कुर्वन्ति स्म। एते अनेकासु अपराधिक-घटनासु अपि संलग्नाः आसन्।






हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

## संस्कृतं मधुरं सदा -०९

विवेकशीलप्राणिनः हि सत्यासत्यस्य विचारं कर्तुमर्हति। मानवजातिमतिरिच्य इतरप्राणिनः विवेकशक्तिः दुर्लभा लोकेऽस्मिन्। नानायोनिषु मानवः हि विवेकयुक्तः प्राणी इति कथ्यते। विवेकस्य सदुपयोगेन सः परमसत्यं ज्ञातुं शक्नुयात्। परन्तु विवेकस्य दुरुपयोगेन च पशुतः अपि निकृष्टतां गन्तुमर्हेत्।

**यावज्जीवं सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत्।**

### भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।

इति। पूर्णतया जडवादिनां मतमेतत्। परन्तु "ब्रह्म सत्यं जगन्मिथ्या" इति भावश्चेत् तत्त्वज्ञानात्मकः सिद्धान्तः वर्तते। जडतृणतः ब्रह्मपर्यन्तं सर्वविधं चिन्तनम् अस्माकं पूर्वजैः मुनिभिः कृतं प्राप्यते। तैः अनुभूतं यत् कस्मिन्नपि लोके सुखस्य प्राप्तिः अस्य जीवनस्य अन्तिमकालस्य पश्चात् हि सम्भवति, वर्तमाने न किमपि उपलभ्यते। ऐहिकजीवनस्य सुखसाधनानि पूर्णतया व्यर्थानि न स्युः चेदपि चिरकालाय तानि मनुष्याय सुखं दातुं न प्रभवेयुः। सुखं न वस्तुनिष्ठम्, अपितु आत्मनिष्ठमेव कथ्यते। यद्यपि कामपूर्तेः समस्तानि साधनानि समीप एव स्युर्नाम, तथापि मनुष्यः दुःखी हि तिष्ठति। परन्तु ऐहिकसुखार्थम् अपेक्षमाणानि साधनानि विना हि मनुष्यः चिरन्तनशान्तिम् अनुभवितुं शक्नुयात्। तैः एतदपि दृष्टं यत् कामपूर्तिविषयाणां साधनानां विपुलता कार्यपूर्तिकरणापेक्षया कामम् इतोऽपि वर्धयित्वा च तज्जन्यदुःखं हि मनुष्ये जनयति। परन्तु मनुष्यस्वभावः यत् सः सर्वत्र सुखं हि इच्छति, दुःखप्राप्तौ चेत् खिद्यते। एतद्विचार्य हि हिन्दुतत्त्वज्ञैः धर्मव्याख्या एवं कृता- 'यतोऽभ्युदय निःश्रेयससिद्धिः" इति। अतः धर्मोऽयं मनुष्यैः सदैव ग्राह्यः इति, शुभम्।

## "सुभाषितरसास्वादः"
## "अर्थवैचित्र्य"

**श्लोकः**- *अम्बुजमम्बुनि जातं, न हि दृष्टं जातमम्बुजादम्बु। अधुना तद्विपरीतं चरणसरोजाद्विनिर्गता गङ्गा।।*

अर्थः- कमलं जले वर्धते, किन्तु पद्ममात् जलस्य उत्पत्तिः कदापि न दृष्टा। परन्तु इदानीं कथं विपरितावस्था अभवत्?

गूढार्थः- किन्तु एतत् कथं जातं पद्ममात् जलं उत्पन्नम्? अतः एवम् अभवत्- गङ्गासदृशः जलौघस्य भगवतः विष्णुपादकमलात् उत्पन्नः, किं न महत् आश्चर्यम्?

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम् ®©**



## वार्ता-संवादः

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य बेङ्गलूरु-नगरस्य यातायात-समस्या-विषये एका वार्ता मया पठिता। 'हुरीया'-नाम्ना निवासिना क्रोश-द्वय-मितं दूरं गन्तुम् एकाधिक-होरा-समयः नीतः। तेन अन्तर्जाले एषः विषयः लिखितः। अन्यैः जनैः अपि एषा नित्या समस्या अनुभूता।

**नन्दिनी-** आम्, महानगरेषु यातायात-कष्टं सर्वैः अनुभूयते एव। इदानीं द्वितीयां वार्तां शृणु। एका आश्चर्यकरी वार्ता 'स्वप्निलः'-नाम्ना वणिजा सामाजिक-माध्यमे प्रकाशिता। तस्य पितृव्येण षष्टि-सहस्र-रूप्यकैः भूमिः क्रीता। त्रिंशद्-वर्षाणां पश्चात् तस्याः भूमेः अर्धः भागः 'डिमार्ट्'-विपण्या पञ्चविंशति-कोटि-रूप्यकैः क्रीतः। सा धन-राशिः तेन पितृव्येण निश्चित-निक्षेपे स्थापिता। अधुना प्रतिमासं सार्ध-चतुर्दश-लक्ष-रूप्यकाणां व्याजः तेन प्राप्यते।

**काव्या-** अहो! भू-निक्षेपे महान् लाभः दृष्टः। किन्तु किञ्चित् पूर्णतया सत्यम् न वदति इति मन्ये अहम्। अहम् एकां मनोरञ्जिकां वार्तां पठितवती अस्मि। केनापि पुरुषेण एकस्य आपणस्य चलच्चित्रं प्रेषितम्। सः आपणः आधुनिक-उपहार-गृहम् इव भासितः, परन्तु सः वस्त्र-समीकरणस्य आपणः दृष्टः। तस्य आपणस्य सुन्दरा सज्जा जनैः दृष्टा, ते च आश्चर्य-चकिताः जाताः।

**नन्दिनी-** हाहा! एषा अतीव हास्यकरी वार्ता। जनैः नूतनाः उपायाः चिन्तिताः। अन्ते देहली-विमानस्थानकस्य एका वार्ता श्रूयताम्। 'सुधीरः' नाम एकः यात्री विदेशात् आगतवान् अस्ति। तेन स्व-पारपत्रं सुरक्षा-स्थाने विस्मृतम्। सः निराशः जातः परन्तु केनचित् सुरक्षा-अधिकारिणा तत् पारपत्रम् अन्विष्टं, तस्मै यात्रिणे च प्रत्यर्पितम्। एतत् साहाय्यं सुधीरेण अन्तर्जाले श्लाघितम्। 'विवेक-अग्निहोत्री'-नाम्ना चलच्चित्र-निर्मात्रा अपि एषः क्षणः 'भारतस्य चमत्कारः' इति उक्तः।

**काव्या-** अतीव उत्तमम्! सुरक्षा-बलेन उत्तमं कार्यं कृतम्। अद्यतनीयः कार्यक्रमः अत्रैव समाप्यते।

# श्रम-रोजगारमन्त्री मनसुख मांडविया जूनागढ़-जनपदस्य बंटवा क्षेत्रे नगरनिगमभवनस्य, उद्यानस्य, रुग्णवाहनस्य च उद्घाटनं कृतवान्



श्रम-रोजगारमन्त्री मनसुख मांडविया महोदयः अद्य गुजरातराज्यस्य जूनागढ़-जनपदस्य बंटवा स्थाने नवनिर्मितस्य नगरनिगमभवनस्य, उद्यानस्य, रुग्णवाहनसेवाभ्याः (एम्बुलेंस) च शुभारम्भं कृतवान्।

### विकासपरियोजनानां विवरणम्

वर्चुअल-माध्यमेन उद्घाटनम्: श्री मांडविया महोदयः आभासी-माध्यमेन (Virtual mode) मनवादार तथा केशोड विधानसभाक्षेत्रयोः ८ कोटि ४३ लक्ष रूप्यकाणां विकासपरियोजनानां उद्घाटनं शिलान्यासञ्च कृतवान्।

**अनुदानस्य सदुपयोगः-:** अस्मिन् अवसरे तेन उक्तं यत् केन्द्र-राज्यसर्वकाराभ्यां संसद्-सदस्येभ्यः (MPs) वियकेभ्यः (MLAs) च प्रदत्तानां अनुदानानां उचितः सदुपयोगः करणीयः।

**भ्रमणविवरणम्**-तदनन्तरं श्री मांडविया महोदयः घेड़ क्षेत्रस्य फूलराम-घेड़ तथा मेखड़ी ग्रामयोः भ्रमणं कृतवान्। उल्लेखनीयं वर्तते यत् मन्त्री महोदयः वर्तमानसमये एकदिवसीय-गुजरात-भ्रमणे अस्ति।

# पश्चिम-एशिया-सङ्घर्षः-: षोडशदिवसे युद्धस्य विभीषिका तीव्रा; इस्राइल-अमेरिका देशयोः ईराने भीषणम् आक्रमणम्



पश्चिम-एशिया-सङ्घर्षः अधुना षोडशमे (१६) दिवसे प्रविष्टः अस्ति। अमेरिका-इस्राइल-देशयोः सेनाभिः ईरान-देशोपरि कृतानां तीव्राक्रमणानां कारणात् इदं युद्धं अधुना अधिकं भयङ्करं जातम्।

### आक्रमणस्य प्रतिघातस्य च विवरणम्

ईरानस्य औद्योगिकनगरे प्रहारः: ईरानदेशस्य औद्योगिकनगरे 'इस्फ़हान' इत्यत्र अनेके आक्रमणाः अभवन्, यत्र पञ्चदश (१५) जनाः मृताः।

**ईरानस्य प्रत्युत्तरम्-:** ईरानस्य 'इस्लामिक रिवोल्यूशनरी गार्ड कोर' (IRGC) इत्यनेन प्रतिशोधस्वरूपं इस्राइल-देशस्य सैन्यस्थानेषु क्षेपणास्त्रैः (Missiles) आक्रमणाः कृताः।

### डोनाल्ड ट्रम्प महोदयस्य संचेतना
### (Alert/Awareness)

अन्तर्राष्ट्रिय-मञ्चे अमेरिका-राष्ट्रपतिः डोनाल्ड ट्रम्प महोदयः स्पष्टीकृतवान् यत्: "अमेरिका-देशः ईरानेन सह कस्यपि सन्धेः (Agreement) कृते सज्जः नास्ति। वर्तमानस्थितयः अस्मभ्यं स्वीकार्याः न सन्ति।" तेन एषा संचेतना (सजगता/पूर्वसूचना) प्रदत्ता यत् आगामिषु आक्रमणेषु ईरानस्य मुख्यं तैल-निर्यातक-केन्द्रं 'खर्ग-द्वीपः' लक्ष्यं भवितुं शक्नोति।

**होर्मुज-जलसन्धेः स्थितिः**-ईरानस्य विदेशमन्त्री सैय्यद अब्बास अराघची महोदयः उद्घोषितवान् यत् होर्मुज-जलडमरूमध्यः (Strait of Hormuz) केवलं अमेरिका-इस्राइल-देशयोः पोतानां कृते पिहितः (Closed) अस्ति। तथापि, वर्धमानस्य प्राणसङ्कटस्य कारणात् वाणिज्यिक-संस्थाभिः अस्मिन् जलमार्गे व्यापारिक-पोतानां गमनागमने महती कर्तनं कृतम् अस्ति।